एतास्तु वामभावेन यजेत्त्रिपुरभैरवीम् ।
सर्व्वत्र पितृदेवादौ यस्माद्भवति दक्षिणः ।
देवी च दक्षिणा यस्मात्तस्मात् दाक्षिण्यमुच्यते ।
या पुनः पूज्यमाना तु देवादीनान्तु पूर्व्वतः ।
यज्ञभागं स्वयं धत्ते सा वामा तु प्रकीर्त्तिता ॥”
इति कालिकापुराणे ७७ अध्यायः ॥

वामाक्षि, क्ली, (वाममक्षि ।) वामचक्षुः । (वर्ण-न्यासे न्यस्तं वाममक्षि येन ।) दीर्घ ईकारः । यथा,—
“कर्पूरं मध्यमान्त्यस्वरपररहितं सेन्दु वामाक्षियुक्तं
बीजन्ते मातरेतत्त्रिपुरहरवधु त्रिःकृतं ये जपन्ति ॥”
इत्यादिकर्पूराख्यस्तोत्रम् ॥

वामाक्षी, स्त्री, (वामे मनोहरे अक्षिणी यस्याः । षच् । ङीष् ।) वामलोचना । इति हेमचन्द्रः ॥

वामाचारः, पुं, (वामो विपरीतो वेदविरुद्धो वा आचारः ।) आचारविशेषः । यथा,—
“पञ्चतत्त्वं खपुष्पञ्च पूजयेत् कुलयोषितम् ।
वामाचारो भवेत्तत्र वामा भूत्वा यजेत् पराम् ॥”
इत्याचारभेदतन्त्रम् ॥
तदाचारवतां नरकगमनं यथा,—
“स्वधर्म्मरहिता विप्रा वेदान्यसेविनः सदा ।
भ्रष्टाचाराश्च वामाश्च ते यान्ति नरकं ध्रुवम् ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २४ अध्यायः ॥
तत्प्रशंसा यथा,—
“चत्वारो देवि वेदाद्याः पशुभावे प्रतिष्ठिताः ।
वामाद्यास्त्रय आचारा दिव्ये वीरे प्रतिष्ठिताः ॥”
इति नित्यातन्त्रम् ॥
“सर्व्वेभ्यश्चोत्तमा वेदा वेदेभ्यो वैष्णवं महत् ।
वैष्णवादुत्तमं शैवं शैवाद्दक्षिणमुत्तमम् ॥
दक्षिणादुत्तमं वामं वामात् सिद्धान्तमुत्तमम् ।
सिद्धान्तादुत्तमं कौलं कौलात् परतरं नहि ॥”
इति कुलार्णवतन्त्रे २ खण्डम् ॥ * ॥
तदाचारयुक्तस्य निषिद्धकर्म्माणि यथा,—
“न दद्यात् ब्राह्मणो मद्यं महादेव्यै कथञ्चन ।
वामकामो ब्राह्मणो हि मद्यं मांसं न भक्षयेत् ॥”
तदनुकल्पो यथा । कुलचूडामणौ ।
“यत्रासवमवश्यन्तु ब्राह्मणस्तु विशेषतः ।
तत्र गुडार्द्रकं दद्यात् ताम्रे वा विन्यसेन्मधु ॥
देव्यास्तु दक्षिणे भागे चक्रपार्श्वे निवेदयेत् ।
एतद्यन्तु शूद्रस्य नान्येषान्तु कदाचन ॥
वैश्यस्य माक्षिकं शुद्धं क्षत्त्रियस्य तु साज्यकम् ।
ब्राह्मणस्य गवां क्षीरं ताम्रे वा विन्यसेन्मधु ।
नारिकेलोदकं कांस्ये सर्व्वेषां द्रव्यशोधनम् ॥”
क्षत्त्रियवैश्ययोस्तु गौड़ी माध्वी च दातव्या तत्र तयोरधिकारात् तदभावे अनुकल्पविधानम् । तथा च ।
“गोक्षीरं ब्राह्मणो दद्यात् द्रव्यमाज्यञ्च बाहुजः ।
वैश्यश्च माक्षिकं द्रव्यं शूद्रः पैष्टादिकं पुनः ॥”
तेन शूद्रस्य नानुकल्पः ॥ * ॥ कुलार्णवे ।
“जलं क्षीरं घृतं भद्रे मधु मैरेयमैक्षवम् ।
पैष्ट्यं तरुभवं धान्यसम्भवं तक्रनिर्म्मितम् ॥
सहकारभवं देवि त्रिविधं बहुभेदकम् ।
मादकं धर्म्मसंभेदात् वर्ज्जयमासीत् सुलोचने ॥
ज्ञानेन संस्कृतन्तत्तु महापातकनाशनम् ।
तद्दाने पातकाभावो दिव्यभावविषयं स ॥ * ॥
माकन्दफलजं रम्यं द्रव्यं सेव्यं द्विजातिभिः ।
अमादकत्वाद्देवेशि ऐक्षवं सेव्यते बुधैः ॥”
एतेन क्षत्त्रियादिभिरमादकं द्रव्यं सेव्यं मादकस्य पापहेतुकत्वमुक्तम् । भैरवतन्त्रे ;
“मद्यं मांसं विना वत्स यत्किञ्चित् कुलसाधनम् ।
शक्त्यै दत्त्वा ततः शेषं गुरवे तन्निवेदयेत् ।
तदनुज्ञां मूर्द्ध्नि कृत्वा शेषमात्मनि योजयेत् ॥”
तेन क्षत्त्रियादीनां मद्यदाने अधिकारः । न पाने । यत्तु ।
“पीत्वा पीत्वा पुनः पीत्वा पतित्वा च महीतले ।
उत्थाय च पुनः पीत्वा पुनर्ज्जन्म न विद्यते ॥”
तत्तु चतुर्थाश्रमिपरम् ॥ * ॥ तद्ग्रहणे जातिचिन्तां न कुर्य्यात् ।
“मदिरायां मैथुने च जातिचिन्तां न कारयेत् ॥”
एतेषां शोधनस्यावश्यकत्वम् । तथा च ।
“संशोधनमनाचर्य्य स्त्रीषु मद्येषु साधकः ।
आचार्य्य सिद्धिहानिः स्यात् क्रुद्धा भवति सुन्दरी ॥”
मद्येषु मुख्यानुकल्पेषु ॥ * ॥ तथा कुलपूजायामस्यावश्यकत्वम् । तथा च ।
“मधु मांसं विना देवि कुलपूजां समाचरेत् ।
जन्मान्तरसहस्रस्य सुकृतं तस्य नश्यति ॥” * ॥
अथ मांसादिशोधनम् ।
“मांसन्तु त्रिविधं ज्ञेयं जलखेचरभूचरम् ।
मांसन्तु त्रिविधं प्रोक्तं देवताप्रीतिकारकम् ॥
मत्स्यञ्च त्रिविधं देवि उत्तमाधममध्यमम् ।
उत्तमं त्रिविधं मत्स्यं शालपाठीनरोहितम् ॥
प्रवीणं कण्टकैर्हीनं तैलाक्तं वल्कलैर्युतम् ।
देव्याः प्रीतिकरञ्चैव मध्यमं तच्चतुर्व्विधम् ।
क्षुद्राणि तानि सर्व्वाणि अधमानि विदुर्बुधाः ॥”
भूचरमांसञ्च ।
“गोमेषाश्वतुलापोत्यगोधाजोष्ट्रमृगोद्भवम् ।
महामांसाष्टकं प्रोक्तं देवताप्रीतिकारकम् ॥”
मांसाभावे अनुकल्पः । समयाचारे ।
“लवणार्द्रकपिण्याकतिलगोधूममाषकम् ।
लशुनञ्च महादेवि मांसप्रतिनिधिः स्मृतः ॥” * ॥
मुद्रा तु द्विविधा । कुलार्णवे ।
“लघरं मण्डलाकारं चन्द्रपद्मनिभं शुभम् ।
चारु पद्ममनोहारि शर्क्कराद्यैश्च पूरितम् ।
पूजाकाले देवताया मुद्रैषा परिकीर्त्तिता ॥”
यामले ।
“भृष्टधान्यादिकं यावत् चर्व्वणीयं प्रकल्पयेत् ।
तेषां संज्ञा कृता मुद्रा महामोदप्रदायिनी ॥”
तेषां शोधनन्तु स्वतन्त्रतन्त्रे । ॐ प्रतद्विष्णुरित्यादि मांसम् । त्र्यम्बकमित्यादि मीनम् । तद्विष्णोरित्यादि मुद्राम् ॥ * ॥ अथ शक्तिशोधनम् । तत्र भावचूड़ामणौ ।
“अदीक्षितकुलासङ्गात् सिद्धिहानिः प्रजायते ।
तत्कथाश्रवणं चेत् स्यात् तत्तत्पगमनं यदि ।
स कुलीनः कथं देवि पूजयेत् परमेश्वरीम् ॥”
श्रीक्रमे । संशोधनमनाचर्य्येति । कौलिकतन्त्रे ।
“अभिषेकाद्भवेच्छुद्धिर्म्मन्त्रस्योच्चारबिन्दुभिः ।
बलाद्वा यत्नतो वापि अभिषेकं समाचरेत् ॥”
अभिषेकमन्त्रस्तु ।
“आदौ वाणीं समुच्चार्य्य त्रिपुरायै समुद्धरेत् ।
नमःशब्दं समुच्चार्य्य इमां शक्तिं ततो वदेत् ॥
पवित्रीकुरु शब्दान्ते मम सिद्धिं कुरु प्रिये ।
वह्निजायां समुच्चार्य्य शुद्धिमन्त्रः सुरेश्वरि ।
तस्याः कर्णेऽभेदबुद्ध्या मायाबीजं समुद्धरेत् ॥”
इति शक्तिशोधनम् ॥ * ॥
ततः शोधितद्रव्यमर्घ्ये क्षिपेत् । श्रीक्रमे अर्घ्यविधौ ।
“पूर्व्वशोधितद्रव्यन्तु गुप्तेनैव च संक्षिपेत् ॥”
स्वतन्त्रतन्त्रे ।
“आद्यद्रव्यमर्घ्यपात्रे निःक्षिप्य प्रयतः सुधीः ।
कुण्डगोलोद्भवं द्रव्यं स्वयम्भुकुसुमं तथा ।
अर्घ्यं दत्त्वा महेशानि सर्व्वसिद्धीश्वरो भवेत् ॥
सुरया चार्घ्यदानेन योगिनीनां भवेत् प्रियः ।
महायोगी भवेद्देवि पीठप्रक्षालितैर्जलैः ॥”
भैरवतन्त्रे ।
“पञ्चमात् तु परं नास्ति शाक्तानां सुखमोक्षयोः ।
केवलैः पञ्चमैर्व्वापि सिद्धो भवति साधकः ॥”
तेन पञ्चमकारेण पूजा कर्त्तव्या । इति तन्त्रसारः ॥

वामापीड़नः, पुं, पीलुवृक्षः । इति शब्दचन्द्रिका ॥

वामिका, स्त्री, (वामा + स्वार्थे कन् । टापि अत इत्वम् ।) चण्डिका । यथा,—
“वक्त्रास्तु चण्डिका देव्या वामिका मूर्त्तयः स्मृताः ।
लक्ष्म्यास्तु वामिका मूर्त्तिरुक्ता दहनभैरवी ॥
नामिदाहं पुरग्राममन्दिरेषु करोत्यलम् ।
अपूजिता महालक्ष्मीर्देहल्यां तास्तु पूजयेत् ॥
वाग्भैरवी सरस्वत्या वामिका मूर्त्तिरीरिता ।
तस्या मन्त्रं पुरा प्रोक्तं शुक्लवर्णा तु सा स्मृता ॥”
इति कालिकापुराणे ७७ अध्यायः ॥

वामिलः, त्रि, (वाम + इलच् ।) दाम्भिकः । वामः । इति मेदिनी । ले, १३१ ॥

वामी, स्त्री, शृगाली । बड़वा । (यथा, रघौ । ५ । ३२ ।
“अथोष्ट्रवामीशतवाहितार्थं
प्रजेश्वरं प्रीतमना महर्षिः ॥”)
रासभी । करभी । इति मेदिनी । मे, ३० ॥

वामोरूः, स्त्री, वामौ सुन्दरौ ऊरू यस्याः । (“संहितशफलचवामाद्रेश ।” ४ । १ । ७० ।